## बभूथाततन्थजगृभ्मववर्थेति निगमे । (६४/२५२७)

बभूथ आततन्थ जगृभ्म ववर्थ इत्येतानि निपात्यन्ते निगमविषये । निगमो वेदः । 'त्वं हि होता प्रथमो बभूथ' (तै. ३.१.४.४) । बभूविथ इति भाषायाम् । आततन्थ – 'येनान्तरिक्षमुर्वाततन्थ' (ऋ. ३.२२.२) । आतेनिथ इति भाषायाम् । जगृभ्म – '[1]जगृभ्मा ते दक्षिणमिन्द्र [2]हस्तम्' (ऋ.१०.४७.१)। जगृहिम इति भाषायाम् । ववर्थ – ववर्थ त्वं हि ज्योतिषा[3] । ववरिथ इति भाषायाम् । [4]क्रादिसूत्रादेव अस्य प्रतिषेधे सिद्धे नियमार्थं वचनम्, निगमे एव, न भाषायाम् इति ॥

## विभाषा सृजिदृशोः । (६५/२४०४)

[5]सृजि दृशि इत्येतयोः थलि [6]विभाषा इडागमो न भवति । सस्रष्ठ, ससर्जिथ । दद्रष्ठ, ददर्शिथ ॥

## इडत्त्यर्तिव्ययतीनाम् । (६६/२३८४)

अत्ति अर्ति व्ययति इत्येतेषां थलि इडागमो भवति । आदिथ । आरिथ । [7]विव्ययिथ । व्येञः 'न व्यो लिटि' (६.१.४६/२४१६) इति आत्वप्रतिषेधः । अत्तिव्ययत्योः 'ऋतो भारद्वाजस्य' (७.२.६३/२२९६) इति नियमाद् विकल्पः[8] । अर्त्तेरपि [9]नित्यः प्रतिषेधः । अत्र इड्ग्रहणं विस्पष्टार्थम् । विकल्पविधाने हि सति अत्ति-व्ययतिग्रहणमनर्थकम्, प्रतिषेधविधाने च अर्तिग्रहणम् इति नित्योऽयं विधिः इड्ग्रहणमन्तरेणापि शक्यते विज्ञातुम् ॥

## वस्वेकाजाद्घसाम् । (६७/३०९६)

कृतद्विर्वचनानां धातूनामेकाचाम्, आकारान्तानाम्, घसेश्च वसौ इडागमो भवति । आदिवान् । आशिवान् । पेचिवान् । शेकिवान्[10] । धात्वभ्यासयोः एकादेशे कृते एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचना एते एकाचो भवन्ति । आत् – ययिवान्[11] । तस्थिवान् । घस् – जक्षिवान् । सिद्धे सत्यारम्भो नियमार्थः, एकाजाद् घसामेव वसाविडागमो भवति नान्येषाम्[12] । बिभिद्वान् । चिच्छिद्वान् । बभूवान् । शिश्रिवान् । क्रादिनियमात् [13]प्रतिषेधाभावाच्च [14]य इट् प्रसक्तः स नियम्यते । आद्ग्रहणमनेकाज्ग्रहणार्थम् । द्विर्वचने हि कृते इटि हि सति आतो लोपेन भवितव्यम् । दरिद्रातेस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम् इत्यामा भवितव्यम् । दरिद्राञ्चकार[15] । अथाप्याम् न क्रियते तथापि च दरिद्रातेः आर्धधातुके लोपः सिद्धश्च प्रत्ययविधौ इति प्रागेव प्रत्ययोत्पत्तेरा[16]कारे लुप्ते इडागमस्य निमित्तं विहतम् इति न इडागमो भवति, ददरिद्र्वान् इति भवितव्यम् । घसेरपि यदि ग्रहणमिह न [17]क्रियते तदा द्विर्वचनात् परत्वाद् 'घसिभसोर्हलि च' (६.४.१००/३५५०) इति [18]उपधालोपे कृते द्विर्वचनमेव न स्यात्, अनच्कत्वात् । [19]इह तु घसिग्रहणाद् उपधालोपमपि परत्वात् इडागमो बाधते । तत्र कृते 'गमहनजनखनघसाम्' (६.४.९८/२३६३) इति उपधालोपः । स च 'द्विर्वचनेऽचि' (१.१.५९/२२४३) इति द्विर्वचने कर्तव्ये स्थानिवद् भवति, तेन जक्षिवान् इति सिध्यति ॥

---

1. जगृभ्णा तै.ब्रा. 2.8.2.5. 2. हस्तम् नास्ति क. 3. ऋ. 1.91.22 4. क्रादिसूत्रादेव नास्ति ब. 5. थलि इति वर्तते निगमग्रहणं न स्वर्यते इत्यधिकम् ह. 6. विभाषया इडागमः भवति इ. 7. संविव्ययिथ क. 8. प्राप्तः इत्यधिकम् क. 9. नित्यं क. 10. सेदिवान् इत्यधिकम् क. 11. पपिवान् इत्यधिकम् क. ड. इ. ह. 12. इति इत्यधिकम् ब. ह. 13. इट् इत्यधिकम् क. 14. वसोरिह इत्यधिकम् क. 15. इति प्राप्नोति इत्यधिकम् क. 16. आकारो लुप्तः क. इ. 17. क्रियेत घसिवसोर्हलि च लोपे कृते क. 18. उपधालोपेन भवितव्यम् इ, नास्ति क. 19. क्रियमाणे हि घसिग्रहणे उपधालोपमपि बाधित्वा इडागमो भवति ह.